# sarasvatIbhuja NgaprayAtastotram

# સરસ્વતીભુજઙ્ગપ્રયાતસ્તોત્રમ્

## Document Information

Text title : Sarasvati Bhujangaprayata stotra

File name : sarasvatIbhujaNgaprayAtastotram.itx

Category : devii, sarasvatI, bhujanga, devI

Location : doc_devii

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : Devi book stall, Kodumgallur, Kerala

Source : Sthothra Rathnaakaram, edited by N. Bappuravu, 2010

Latest update : August 6, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# સરસ્વતીભુજઙ્ગપ્રયાતસ્તોત્રમ્

સદા ભાવયેઽહં પ્રસાદેન યસ્યાઃ
પુમાંસો જડાઃ સન્તિ લોકૈકનાથે ।
સુધાપૂરનિષ્યન્દિવાગ્રીતયસ્ત્વાં
સરોજાસનપ્રાણનાથે હૃદન્તે ॥ ૧॥

વિશુદ્ધાર્કશોભાવલક્ષ્ઁ વિરાજ-
જ્જટામણ્ડલાસક્તશીતાંશુખણ્ડા ।
ભજામ્યર્ધદોષાકરોદ્યલ્લલાટં
વપુસ્તે સમસ્તેશ્વરિ શ્રીકૃપાબ્ધે ॥ ૨॥

મૃદુભ્રૂલતાનિર્જિતાનઙ્ગચાપં
દ્યુતિધ્વસ્તનીલારવિન્દાયતાક્ષમ્ ।
શરત્પદ્મકિઞ્જલ્કસઙ્કાશનાસં
મહામૌક્તિકાદર્શરાજત્કપોલમ્ ॥ ૩॥

પ્રવાલાભિરામાધરં ચારુમન્દ-
સ્મિતાભાવનિર્ભર્ત્સિતેન્દુપ્રકાશમ્ ।
સ્ફુરન્મલ્લિકાકુડ્મલોલ્લાસિદન્તં
ગલાભાવિનિર્ધૂતશઙ્ખાભિરમ્યમ્ ॥ ૪॥

વરં ચાભયં પુસ્તકં ચાક્ષમાલાં
દધદ્ભિશ્ચતુર્ભિઃ કરૈરમ્બુજાભૈઃ ।
સહસ્રાક્ષકુમ્ભીન્દ્રકુમ્ભોપમાન-
સ્તનદ્વન્દ્વમુક્તાઘટાભ્યાં વિનમ્રમ્ ॥ ૫॥

સ્ફુરદ્રોમરાજિપ્રભાપૂરદૂરી-
કૃતશ્યામચક્ષુઃશ્રવઃકાન્તિભારમ્ ।
ગભીરત્રિરેખાવિરાજત્પિચણ્ડ-
દ્યુતિધ્વસ્તબોધિદ્રુમસ્નિગ્ધશોભમ્ ॥ ૬॥

લસત્સૂક્ષ્મશુક્લામ્બરોદ્યન્નિતમ્બં
મહાકાદલસ્તમ્બતુલ્યોરુકાણ્ડમ્ ।
સુવૃત્તપ્રકામાભિરામોરુપર્વ-
પ્રભાનિન્દિતાનઙ્ગસામુદ્ગકાભમ્ ॥ ૭॥

ઉપાસઙ્ગસઙ્કાશજઙ્ઘં પદાગ્ર-
પ્રભાભર્ત્સિતોત્તુઙ્ગકૂર્મપ્રભાવમ્ ।
પદામ્ભોજસમ્ભાવિતાશોકસાલં
સ્ફુરચ્ચન્દ્રિકાકુડ્મલોદ્યન્નખાભમ્ ॥ ૮॥

નમસ્તે મહાદેવિ હે વર્ણરૂપે
નમસ્તે મહાદેવિ ગીર્વાણવન્દ્યે ।
નમસ્તે મહાપદ્મકાન્તારવાસે
સમસ્તાં ચ વિદ્યાં પ્રદેહિ પ્રદેહિ ॥ ૯॥

નમઃ પદ્મભૂવક્ત્રપદ્માધિવાસે
નમઃ પદ્મનેત્રાદિભિઃ સેવ્યમાને ।
નમઃ પદ્મકિઞ્જલ્કસઙ્કાશવર્ણે
નમઃ પદ્મપત્રાભિરામાક્ષિ તુભ્યમ્ ॥ ૧૦॥

પલાશપ્રસૂનોપમં ચારુતુણ્ડં
બલારાતિનીલોત્પલાભં પતત્રમ્ ।
ત્રિવર્ણં ગલાન્તં વહન્તં શુકં તં
દધત્યૈ મહત્યૈ ભવત્યૈ નમોઽસ્તુ ॥ ૧૧॥

કદમ્બાટવીમધ્યસંસ્થાં સખીભિઃ
મનોજ્ઞાભિરાનન્દલીલારસાભિઃ ।
કલસ્વાનયા વીણયા રાજમાનાં
ભજે ત્વાં સરસ્વત્યહં દેવિ નિત્યમ્ ॥ ૧૨॥

સુધાપૂર્ણહૈરણ્યકુમ્ભાભિષેક-
પ્રિયે ભક્તલોકપ્રિયે પૂજનીયે ।
સનન્દાદિભિર્યોગિભિર્યોગિનીભિઃ
જગન્માતરસ્મન્મનઃ શોધય ત્વમ્ ॥ ૧૩॥

અવિદ્યાન્ધકારૌઘમાર્તાણ્ડદીપ્ત્યૈ

સુવિદ્યાપ્રદાનોત્સુકાયૈ શિવાયૈ ।
સમસ્તાર્તરક્ષાકરાયૈ વરાયૈ
સમસ્તામ્બિકે દેવિ દુભ્યં નમોઽસ્તુ ॥ ૧૪॥

પરે નિર્મલે નિષ્કલે નિત્યશુદ્ધે
શરણ્યે વરેણ્યે ત્રયીમય્યનન્તે ।
નમોઽસ્ત્વમ્બિકે યુષ્મદીયાઙ્ઘ્રિપદ્મે
રસજ્ઞાતલે સન્તતં નૃત્યતાં મે ॥ ૧૫॥

પ્રસીદ પ્રસીદ પ્રસીદામ્બિકે મા-
મસીમાનુદીનાનુકમ્પાવલોકે ।
પદામ્ભોરુહદ્વન્દ્વમેકાવલમ્બં
ન જાને પરં કિઞ્ચિદાનન્દમૂર્તે ॥ ૧૬॥

ઇતીદં ભુજઙ્ગપ્રયાતં પઠેદ્યો
મુદા પ્રાતરુત્થાય ભક્ત્યા સમેતઃ ।
સ માસત્રયાત્પૂર્વમેવાસ્તિ નૂનં
પ્રસાદસ્ય સારસ્વતસ્યૈકપાત્રમ્ ॥ ૧૭॥

ઇતિ શ્રીસરસ્વતીભુજઙ્ગપ્રયાતસ્તોત્રં સમાપ્તમ્ ॥

Proofread by PSA Easwaran

*sarasvatIbhuja NgaprayAtastotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*